PU692F

# षष्ठः पाठः
# ईदमहोत्सवः

(याकूबः सलीमः सलमा च इति त्रीणि मित्राणि गगनोन्मुखानि भूत्वा सायं द्रष्टुं चेष्टन्ते। यतः हि ईदस्य चन्द्रदर्शनं नातीव सरलम्।)

**याकूबः** — अद्य चन्द्रस्य दर्शनं जातम् श्वः एव ईदस्य महोत्सवो भविष्यति।

**सलीमः** — मित्र! ईद दिवसस्य निर्णय : क : ?

**याकूबः** — दिल्लीतः इमामो महोदयः करिष्यति। रात्रौ एव तस्य उद्घोषो भविष्यति। सखि सलमे! किं त्वम् उद्घोषं ध्यानेन श्रुत्वा आवां सूचयिष्यसि?

**सलमा** — अहम् अवश्यं सूचयिष्यामि। इमाममहोदयः रात्रौ संसूचयति यत् अद्य चन्द्रदर्शनं जातम्। अतः श्वः एव ईदस्य उत्सवो भविष्यति। तम् उद्घोषं श्रुत्वा अतीव प्रसन्ना सलमा याकूबं सलीमं च सूचयति।



**याकूबः** — श्वः वयं प्रातःकाले एव "ईदगाहं" चलिष्यामः।

**सलीमः** — वयं तत्र गमनाय स्वच्छानि, नवानि वस्त्राणि एव धारयेम्। सखि सलमे ! त्वं किं करिष्यसि?

**सलमा** — सखे! अहम् ईदोत्सवे नवानि एव वस्त्राणि धारयिष्यामि।

**याकूबः** — तर्हि युवां श्वः ममैव गृहम् आगमिष्यथः। वयम् इतः युगपदेव ईदगाहं गमिष्यामः।

प्रातःकाले सलीमसलमे सोल्लासं याकूबस्य गृहम् आगच्छतः। ततः ते ईदगाहं प्रति गच्छन्ति। तत्र प्रथमं ते पङ्क्तौ स्थित्वा स्व–ईश्वरस्य प्रार्थनां कुर्वन्ति। तत्पश्चात् परस्परं स्नेहेन आलिङ्गन्ति। ते मेलापकस्य मनोहरं दृश्यं दृष्ट्वा सुस्वादूनि मिष्टान्नानि क्रीत्वा गृहं प्रत्यागच्छन्ति। सायं पुनः ते अन्योन्यं गृहं गत्वा दीर्घसूत्रिकाः खादन्ति परस्परं मिलन्ति च।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| जातम् | = हुआ। | श्वः | = कल (आने वाला)। |
| भविष्यति | = होगी। | श्रुत्वा | = सुनकर। |
| सूचयिष्यसि | = सूचित करोगे। | चलिष्यामः | = चलेंगे। |
| गमनाय | = जाने के लिये। | धारयेम् | = धारण करें। |
| वस्त्राणि | = वस्त्रों को। | आगमिष्यथ | = आओगे। |

| | | | |
|---|---|---|---|
| उद्घोषम् | = घोषणा। | इतः | = यहां से। |
| युगपदेव | = एक साथ ही। | गमिष्यामः | = जायेंगे। |
| सुस्वादूनि | = मीठी। | क्रीत्वा | = खरीदकर। |
| गत्वा | = जाकर। | खादन्ति | = खाते हैं। |
| दीर्घसूत्रिकाः | = सिवइयाँ। | कुर्वन्ति | = करते हैं। |
| गच्छन्ति | = जाते हैं। | | |

प्रत्यागच्छन्ति = लौटकर आते हैं। (प्रति+ आगच्छन्ति)

## अभ्यासः

**प्रश्न 1. संस्कृत में उत्तर दीजिए –**

(क) याकूबः, सलीमः सलमा च कं द्रष्टुं चेष्टन्ते ?

(ख) ईददिवसस्य निर्णयं कः करोति ?

(ग) ईदस्य उद्घोषं श्रुत्वा सलमा कौ सूचयति ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति कीजिये –**

(क) अद्य चन्द्रस्य दर्शनं ......................................।

(ख) ...................................... अवश्यं सूचयिष्यामि।

(ग) ततः ते ...................................... प्रति गच्छन्ति।

**प्रश्न 3.(क) सन्धि विच्छेद कीजिए –**

गगनोन्मुखानि, ईदोत्सवे, ममैव,

**प्रश्न 4. संस्कृत में अनुवाद कीजिए –**

(क) चन्द्र का दर्शन कब होगा ?

(ख) उसे नवीन वस्त्र धारण करना चाहिए।

(ग) क्या तुम मेरे घर जाओगे ?

(घ) वहाँ ईश की प्रार्थना होती है।

PUF543